# *Sarvamatasaṁgraha* on the *Saṅkarṣha Kāṇḍa*

*Sarvamatasaṁgraha*

1. एवं पूर्वोत्तरकाण्डात्मना भिन्नस्य वेदस्याध्ययनविधिपरिगृहीतत्वाद्विवक्षितार्थत्वेन निश्चितस्यार्थविचाराय मीमांसासास्त्रं प्रवृत्तम् । तच्च विंशत्यध्यायपरिमितं काण्डत्रयात्मकं भवति । तत्र पूर्वमीमांसा द्वादशाध्यायमिता कर्मकाण्डनिष्ठा । तत्सूत्रकर्त्ता जैमिनिः । --- उत्तरमीमांसा तु द्विरूपा सगुणनिर्गुणब्रह्मनिष्ठा अष्टाध्यायमिता व्यासप्रणीता । तत्र सगुणब्रह्मनिष्ठा देवताकाण्डात्मिकाध्यायचतुष्टयवती । एवं मध्यममीमांसा सर्वदेवतात्मनो हरेः प्रतिपादिकेति सगुणब्रह्मपरा भवति । ज्ञानकाण्डात्मिका तु निर्गुणब्रह्मनिष्ठा । सापि चतुरध्यायमिता । --- प्रति कर्मकाण्डं प्रवृत्तम् । --- प्रति देवताकाण्डं प्रवृत्तम् । --- अधिकृत्य ब्रह्मकाण्डं प्रवृत्तम् ।

2. तत्र प्रथमेऽध्याये सर्वेषां मन्त्रविशेषाणां देवतातत्त्वप्रतिपादने तात्पर्यमिति प्रतिपादितम् । द्वितीये विध्यर्थवादादेर्वेदशेषस्य मन्त्रदेवताशेषत्वमुपपाद्यते । तृतीये देवतातत्त्वं स्वेच्छाविग्रहत्वादिगुणागुणालङ्कितमिति दर्शितम् । चतुर्थे तत्तेवताप्रसादतस्तत्तल्लोकवेषविभूषणैश्वर्यानन्दवाप्तिलक्षणं देव-तोपासनफलं निर्णीतम् । एवम्मध्यममीमांसा सर्वदेवतात्मनो हरेः प्रतिपादिकेति सगुणब्रह्मपरा भवति

*Sarvamatasaṁgraha,* Trivandrum Sanskrit Series, No. 62, 1918. Quoted by Atsushi and by Laveriere.